श्री कृष्ण स्तुतिः (अक्रूर कृतं)

श्री कृष्ण स्तुतिः (अक्रूर कृतं)

अक्रूर उवाच |
नतोऽस्म्यहं त्वाखिलहेतुहेतुं
नारायणं पूरुषमाद्यमव्ययं |
यन्नाभिजातादरविंदकोशा-
-द्ब्रह्माऽऽविरासीद्यत एष लोकः || 1 ||

भूस्तोयमग्निः पवनः खमादि-
-र्महानजादिर्मन इंद्रियाणि |
सर्वेंद्रियार्था विबुधाश्च सर्वे
ये हेतवस्ते जगतोऽंगभूताः || 2 ||

नैते स्वरूपं विदुरात्मनस्ते
ह्यजादयोऽनात्मतया गृहीताः |
अजोऽनुबद्धः स गुणैरजाया
गुणात् परं वेद न ते स्वरूपं || 3 ||

त्वां योगिनो यजंत्यद्धा महापुरुषमीश्वरं |
साध्यात्मं साधिभूतं च साधिदैवं च साधवः || 4 ||

त्रय्या च विद्यया केचित्त्वां वै वैतानिका द्विजाः |
यजंते विततैर्यज्ञैर्नानारूपामराख्यया || 5 ||

एके त्वाखिलकर्माणि संन्यस्योपशमं गताः |
ज्ञानिनो ज्ञानयज्ञेन यजंति ज्ञानविग्रहं || 6 ||

अन्ये च संस्कृतात्मानो विधिनाभिहितेन ते |
यजंति त्वन्मयास्त्वां वै बहुमूर्त्येकमूर्तिकं || 7 ||

त्वामेवान्ये शिवोक्तेन मार्गेण शिवरूपिणं |
बह्वाचार्यविभेदेन भगवान् समुपासते || 8 ||

सर्व एव यजंति त्वां सर्वदेवमयेश्वरं |
येऽप्यन्यदेवताभक्ता यद्यप्यन्यधियः प्रभो || 9 ||

यथाद्रिप्रभवा नद्यः पर्जन्यापूरिताः प्रभो |
विशंति सर्वतः सिंधुं तद्वत्त्वां गतयोऽंततः || 10 ||

सत्त्वं रजस्तम इति भवतः प्रकृतेर्गुणाः |
तेषु हि प्राकृताः प्रोता आब्रह्मस्थावरादयः || 11 ||

तुभ्यं नमस्तेऽस्त्वविषक्तदृष्टये
सर्वात्मने सर्वधियां च साक्षिणे |
गुणप्रवाहोऽयमविद्यया कृतः
प्रवर्तते देवनृतिर्यगात्मसु || 12 ||

अग्निर्मुखं तेऽवनिरंघ्रिरीक्षणं
सूर्यो नभो नाभिरथो दिशः श्रुतिः |
द्यौः कं सुरेंद्रास्तव बाहवोऽर्णवाः
कुक्षिर्मरुत् प्राणबलं प्रकल्पितं || 13 ||

रोमाणि वृक्षौषधयः शिरोरुहा
मेघाः परस्यास्थिनखानि तेऽद्रयः |
निमेषणं रात्र्यहनी प्रजापति-
-र्मेढ्रस्तु वृष्टिस्तव वीर्यमिष्यते || 14 ||

त्वय्यव्ययात्मन् पुरुषे प्रकल्पिता
लोकाः सपाला बहुजीवसंकुलाः |
यथा जले संजिहते जलौकसो-
-ऽप्युदुंबरे वा मशका मनोमये || 15 ||

यानि यानीह रूपाणि क्रीडनार्थं बिभर्षि हि |
तैरामृष्टशुचो लोका मुदा गायंति ते यशः || 16 ||

नमः कारणमत्स्याय प्रळयाब्धिचराय च |
हयशीर्ष्णे नमस्तुभ्यं मधुकैटभमृत्यवे || 17 ||

अकूपाराय बृहते नमो मंदरधारिणे |
क्षित्युद्धारविहाराय नमः सूकरमूर्तये || 18 ||

नमस्तेऽद्भुतसिंहाय साधुलोकभयापह |
वामनाय नमस्तुभ्यं क्रांतत्रिभुवनाय च || 19 ||

नमो भृगूणां पतये दृप्तक्षत्रवनच्छिदे |
नमस्ते रघुवर्याय रावाणांतकराय च || 20 ||

नमस्ते वासुदेवाय नमः संकर्षणाय च |
प्रद्युम्नायानिरुद्धाय सात्वतां पतये नमः || 21 ||

नमो बुद्धाय शुद्धाय दैत्यदानवमोहिने |
म्लेच्छप्रायक्षत्रहंत्रे नमस्ते कल्किरूपिणे || 22 ||

भगवन् जीवलोकोऽयं मोहितस्तव माययाा |
अहं ममेत्यसद्ग्राहो भ्राम्यते कर्मवर्त्मसु || 23 ||

अहं चात्मात्मजागार दारार्थस्वजनादिषु |
भ्रमामि स्वप्नकल्पेषु मूढः सत्यधिया विभो || 24 ||

अनित्यानात्मदुःखेषु विपर्ययमतिर्ह्यहं |
द्वंद्वारामस्तमोविष्टो न जाने त्वाऽऽत्मनः प्रियं || 25 ||

यथाबुधो जलं हित्वा प्रतिच्छन्नं तदुद्भवैः |
अभ्येति मृगतृष्णां वै तद्वत्त्वाहं पराङ्मुखः || 26 ||

नोत्सहेऽहं कृपणधीः कामकर्महतं मनः |
रोद्धुं प्रमाथिभिश्चाक्षैर्ह्रियमाणमितस्ततः || 27 ||

सोऽहं तवांघ्र्युपगतोऽस्म्यसतां दुरापं
तच्चाप्यहं भवदनुग्रह ईश मन्ये |
पुंसो भवेद्यर्हि संसरणापवर्ग-
-स्त्वय्यब्जनाभ सदुपासनया मतिः स्यात् || 28 ||

नमो विज्ञानमात्राय सर्वप्रत्ययहेतवे |
पुरुषेशप्रधानाय ब्रह्मणेऽनंतशक्तये || 29 ||

नमस्ते वासुदेवाय सर्वभूतक्षयाय च |
हृषीकेश नमस्तुभ्यं प्रपन्नं पाहि मां प्रभो || 30 ||

इति श्रीमद्भागवते दशमस्कंधे चत्वारिंशोऽध्याये अक्रूरस्तुतिर्नाम श्री कृष्ण स्तोत्रं ||